श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### एकत्रिंशः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## एकत्रिंशः सर्गः

*हनुमता सीतां श्रावयितुं श्रीरामकथाया वर्णनम्*

एवं बहुविधां चिन्तां चिन्तयित्वा महामतिः।
संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह॥ ५.३१.१ ॥

राजा दशरथो नाम रथकुञ्जरवाजिमान्।
पुण्यशीलो महाकीर्तिरिक्ष्वाकूणां महायशाः॥ ५.३१.२ ॥

राजर्षीणां गुणश्रेष्ठस्तपसा चर्षिभिः समः।
चक्रवर्तिकुले जातः पुरन्दरसमो बले॥ ५.३१.३ ॥

अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः।
मुख्यस्येक्ष्वाकुवंशस्य लक्ष्मीवाँल्लक्ष्मिवर्धनः॥ ५.३१.४ ॥

पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः।
पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी॥ ५.३१.५ ॥

तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः।
रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम्॥ ५.३१.६ ॥

रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता।
रक्षिता जीवलोकस्य धर्मस्य च परन्तपः॥ ५.३१.७ ॥

तस्य सत्याभिसन्धस्य वृद्धस्य वचनात् पितुः।
सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनम्॥ ५.३१.८ ॥

तेन तत्र महारण्ये मृगयां परिधावता।
राक्षसा निहताः शूरा बहवः कामरूपिणः॥ ५.३१.९ ॥

www.prapatti.com

जनस्थानवधं श्रुत्वा निहतौ खरदूषणौ।
ततस्त्वमर्षापहृता जानकी रावणेन तु॥ ५.३१.१० ॥

वञ्चयित्वा वने रामं मृगरूपेण मायया।
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम्॥ ५.३१.११ ॥

आससाद वने मित्रं सुग्रीवं नाम वानरम्।
ततः स वालिनं हत्वा रामः परपुरञ्जयः॥ ५.३१.१२ ॥

आयच्छत् कपिराज्यं तु सुग्रीवाय महात्मने।
सुग्रीवेणाभिसन्दिष्टा हरयः कामरूपिणः॥ ५.३१.१३ ॥

दिक्षु सर्वासु तां देवीं विचिन्वन्तः सहस्रशः।
अहं सम्पातिवचनाच्छतयोजनमायतम्॥ ५.३१.१४ ॥

तस्या हेतोर्विशालाक्ष्याः समुद्रं वेगवान् प्लुतः।
यथारूपां यथावर्णां यथालक्ष्मवतीं च ताम्॥ ५.३१.१५ ॥

अश्रौषं राघवस्याहं सेयमासादिता मया।
विररामैवमुक्त्वा स वाचं वानरपुङ्गवः॥ ५.३१.१६ ॥

जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता।
ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम्।
उन्नम्य वदनं भीरुः शिंशपामन्ववैक्षत॥ ५.३१.१७ ॥

निशम्य सीता वचनं कपेश्च
    दिशश्च सर्वाः प्रदिशश्च वीक्ष्य।
स्वयं प्रहर्षं परमं जगाम
    सर्वात्मना राममनुस्मरन्ती॥ ५.३१.१८ ॥

सा तिर्यगूर्ध्वं च तथा ह्यधस्ता-
    न्निरीक्षमाणा तमचिन्त्यबुद्धिम्।

www.prapatti.com

ददर्श पिङ्गाधिपतेरमात्यं
वातात्मजं सूर्यमिवोदयस्थम्॥ ५.३१.१९ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकत्रिंशः सर्गः॥

www.prapatti.com